उपशास्त्री - II    साहित्य - तृतीय - पत्रम्

किरातार्जुनीय - महाकाव्यम्

Saathi

Date __/__/____

प्र० (1) - किरातार्जुनीयस्य प्रथम सर्गे किं नाम छन्दोविधानम् ?

उत्तरम् - महाकवि भारवि - विरचिते 'किरातार्जुनीय काव्यस्य प्रथमसर्गे' विशेषतया वंशस्थ वृत्तं प्रयुक्तम् । तल्लक्षणम् - 'जातौ तु वंशस्थ मुदीरितं जरौ' । काव्यनियमेनान्ते: एकं पुष्पिताग्रा छन्दः (अयुजि नयुग रेफतो यकारो युजि च न जौ जरगाश्च पुष्पिताग्रा) तथैकं मालिनी नाम-वृत्तम् - तल्लक्षणम् - ननमयययुतेयं मालिनी भोगिलोकैः इति । शासन-पद्धतिम् ब्रह्मचारिवेषधारिणं वनेचर-मादिष्टवान् । सः वनेचरः दुर्योधनस्य शासन प्रणाली ज्ञात्वा द्वैतवने युधिष्ठिरं प्रतिसमागतवान् । सच तद्राज्य प्रबन्ध सम्बन्धे वक्तुमारेभे -

हे राजन्! चारचक्षुषः राजानः अनुजीविभिः न वंचनीयाः । अतः मदुक्तं वा भवताक्षन्तव्यम् । यतः हितं मनोहारि च वचः दुर्लभं भवति । यः आमात्यादिः प्रभुम् हितं नोपदिशति सः कुत्सितः अतः मया यद्ज्ञातं तत्सर्वं निवेदयामि ।

राज्य सिंहासनस्थोऽपि दुर्योधनः भवतः पराजयं निर्मलं यशः तनोति । कामक्रोधादि षड्रिपुन् विजित्य कामं विभज्य च नयेन पौरुषं वितनोति । सुयोधनः धर्मबुद्ध्या लोकान् दण्डयति । स योग्यमेव सत्करोति । तेन रक्षिता मही विपुल वस्तुमुत्पादयति । वीरभट्टाः प्रसन्नाः सन्त अस्य प्राणैः प्रियाणि कर्तुम् इच्छन्ति । स सुयोग्य गुप्तचर-द्वाराऽन्य नृपाणां गुप्तरहस्यं जानाति । अस्य शासनं सर्वे माल्यमिव शिरसा वहन्ति । अतः शत्रु प्रतिकारं करणे समुद्यतो भव ।

Renu Devi
08/09/20
राधा उमाकान्त सं० महावि० सुरबसेना, पूर्णिया

उपशास्त्री-I साहित्य - तृतीय - पत्रम्
किरातार्जुनीय महाकाव्यम्
प्रथमः सर्गः

Date __/__/____

प्र०(1) - दुर्योधनः शास्त्रज्ञ समदर्शी पूर्णः कुशलश्चास्तीति कथमवगम्यते ? कथञ्च तस्योपायः प्रयोगस्य फलवता प्रतीयते ?

उत्तरम् - सः समुचितरीत्या कालं विभज्य समपक्षपातया धर्मार्थकामनां सेवनं करोति। अतएव तद्गुणलुब्धास्ते परस्परं संख्यं प्राप्तवन्तः न बाध्यन्ते निरहङ्कारः सः मनूपदिष्ट पद्धत्या शास्त्रानुसारेण जागरूकः रात्रिदिवं विभज्य पौरुषं विस्तारयन् भृत्यान् मित्राणि बन्धुभिः तुल्यसंस्कारान् प्रदर्शयन् प्रजाः शास्ति। सः चोचितस्थानेषु व्यक्तिषु वा सम्यक् विभज्य नियुक्ताः समुचित प्रयोगेण अनुगृहीता सामाद्युपायः परस्परं स्पर्द्धाहीनाः सततं धान्यादिकं समुत्पादयन्ति। अनेन तस्य समदर्शिता पूर्णकुशलता या फलवता च प्रतीयते।

Renu Devi
08/09/20
राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया।

शास्त्री-II साहित्य

मेघदूतम्

सूक्तिव्याख्याभागः - पूर्वमेघः

Date ___/___/___

प्र० (1) - न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय।
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः॥

उत्तरम् - प्रसंगः - इयं सूक्तिः महाकवि कालिदासप्रणीतस्य मेघदूतस्य खण्डकाव्यस्य पूर्वमेघस्यास्ति। यक्षः संदेशवाहकं मेघं प्रेषयन्नाह - हे मेघ! धारासम्पातेन निवारितदावानलं अध्वक्लान्तं त्वां दृष्ट्वा आम्रकूटपर्वतः स्वशिखरे धारयिष्यति। वर्षाजलेन दावाग्निप्रशमनात् त्वं आम्रकूटस्य मित्रमसि। मित्रे समागते क्षुद्रोऽपि जनः पूर्वोपकारं स्मरन् तत्स्वागतं करोति। यस्तादृशः उन्नतः सः आम्रकूटः त्वन्मित्रस्वागत पराङ्मुखो न भवतीति किं वाच्यम्।

क्षुद्रः अपि। मित्रे = सुहृदि, संश्रयाय = आश्रयाय, प्राप्ते = समागते, विमुखः = पराङ्मुखः न भवति। तथा = तेन प्रकारेण, उच्चैः = उन्नतः (स आम्रकूटपर्वतः) किं पुनः = किं भूयः। विमुखो भवतीति किं कथनीयमिति भावः।

Renu Devi
08/09/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया।

शास्त्री -I

साहित्य

अभिज्ञान शाकुन्तलम्

Date ___/___/_____

प्र० (1) - कीदृशः मृगः शकुन्तलायाः पदवीं न जहाति ?

उत्तरम् - पतिगृहं प्रस्थितायाः शकुन्तलायाँ वसनाञ्चलं गृहीत्वाऽऽकर्षयन्तं मृगशिशुमवलोक्य महर्षिः कण्वः कथयति ।

यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे ।
श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ॥

प्र० (2) - महर्षिः कण्वः दुष्यन्ताय किं संदेशं कथयति ?

उत्तरम् - राज्ञे दुष्यन्ताय सन्देष्टव्यमर्थं विवृण्वन् महर्षिः कण्वः कथयति -

अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मन
स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः ॥

Renu Devi
08/09/20

राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।